# Ashvatthamahima Stotram

# અશ્વત્થમહિમાસ્તોત્રમ્

## Document Information

Text title : Ashvatthamahima Stotram

File name : ashvatthamahimAstotram.itx

Category : deities_misc, skandapurANa, stotra

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : skandapurANa | nAgarakhaNDa | adhyAya 247/24-44||

Latest update : August 24, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 23, 2025

*sanskritdocuments.org*

# અશ્વત્થમહિમાસ્તોત્રમ્

ઈશ્વરઃ સર્વભૂતાનાં કૃપયા વૃક્ષમાશ્રિતઃ ॥ ૨૪॥

ચાતુર્માસ્યેઽથ સમ્પ્રાપ્તે સર્વભૂતદયાકરઃ ।
અશ્વત્થોઽતઃ સદા સેવ્યો મન્દવારે વિશેષતઃ ॥ ૨૫॥

નિત્યમશ્વત્થસંસ્પર્શાત્પાપં યાતિ સહસ્રધા ।
દુગ્ધેન તર્પણં યે વૈ તિલમિશ્રેણ ભક્તિતઃ ॥ ૨૬॥

સેચનં વા કરિષ્યન્તિ તૃપ્તિસ્તત્પૂર્વજેષુ ચ ।
દર્શનાદેવ વૃક્ષસ્ય પાતકં તુ વિનશ્યતિ ॥ ૨૭॥

પિપ્પલઃ પૂજિતો ધ્યાતો દૃષ્ટઃ સેવિત એવ વા ।
પાપરોગવિનાશાય ચાતુર્માસ્યે વિશેષતઃ ।
અશ્વત્થં પૂજિતં સિક્તં સર્વભૂતસુખાવહમ્ ॥ ૨૮॥

સર્વામયહરં ચૈવ સર્વપાપૌઘહારિણમ્ ।
યે નરાઃ કીર્તયિષ્યન્તિ નામાપ્યશ્વત્થવૃક્ષજમ્ ॥ ૨૯॥

ન તેષાં યમલોકસ્ય ભયં માર્ગે પ્રજાયતે ।
કુઙ્કુમૈશ્ચન્દનૈશ્ચૈવ સુલિપ્તં યશ્ચ કારયેત્ ॥ ૩૦॥

તસ્ય તાપત્રયાભાવો વૈકુણ્ઠે ગણતા ભવેત્ ।
દુઃસ્વપ્નં દુષ્ટચિન્તાઞ્ચ દુષ્ટજ્વરપરાભવાન્ ॥ ૩૧॥

વિલયં નય પાપાનિ પિપ્પલ ત્વં હરિપ્રિય ।
મન્ત્રેણાનેન યે દેવાઃ પૂજયિષ્યન્તિ પિપ્પલમ્ ॥ ૩૨॥

તતસ્તેષાં ધર્મરાજો જાયતે વાક્યકારકઃ ।
અશ્વત્થો વચનેનાપિ પ્રોક્તો જ્ઞાનપ્રદો નૃણાં। ॥૧૩૩॥

શ્રુતો હરતિ પાપં ચ જન્માદિ મરણાવધિ ।
અશ્વત્થસેવનં પુણ્યં ચાતુર્માસ્યે વિશેષતઃ ॥ ૩૪॥

સુપ્તે દેવે વૃક્ષમધ્યમાસ્થાય ભગવાન્પ્રભુઃ ।
જલં પૃથ્વીગતં સર્વં પ્રપિબન્નિવ સેવતે ॥ ૩૫॥

જલં વિષ્ણુર્જલત્વેન વિષ્ણુરેવ રસો મહાન્ ।
તસ્માદ્વૃક્ષગતો વિષ્ણુશ્ચાતુર્માસ્યેઽઘનાશનઃ ॥ ૩૬॥

સર્વભૂતગતો વિષ્ણુરાપ્યાયયતિ વૈ જગત્ ।
તથાશ્વત્થગતં વિષ્ણું યો નમસ્યેન્ન નારકી ॥ ૩૭॥

અશ્વત્થં રોપયેદ્યસ્તુ પૃથિવ્યાં પ્રયતો નરઃ ।
તસ્ય પાપસહસ્રાણિ વિલયં યાન્તિ તત્ક્ષણાત્ ॥ ૩૮॥

અશ્વત્થઃ સર્વવૃક્ષાણાં પવિત્રો મઙ્ગલાન્વિતઃ ।
મુક્તિદો રોપિતો ધ્યાતશ્ચાતુર્માસ્યેઽઘનાશનઃ ॥ ૩૯॥

અશ્વત્થે ચરણં દત્ત્વા બ્રહ્મહત્યા પ્રજાયતે ।
નિષ્કારણં સઙ્કુથિત્વા નરકે પચ્યતે ધ્રુવમ્ ॥ ૪૦॥

મૂલે વિષ્ણુઃ સ્થિતો નિત્યં સ્કન્ધે કેશવ એવ ચ ।
નારાયણસ્તુ શાખાસુ પત્રેષુ ભગવાન્હરિઃ ॥ ૪૧॥

ફલેઽચ્યુતો ન સન્દેહઃ સર્વદેવૈઃ સમન્વિતઃ ।
ચાતુર્માસ્યે વિશેષેણ દ્રુમપૂજી સ મુક્તિભાક્ ॥ ૪૨॥

તસ્માત્સર્વપ્રયત્નેન સદૈવાશ્વત્થસેવનમ્ ।
યઃ કરોતિ નરો ભક્ત્યા પાપં યાતિ દિનોદ્ભવમ્ ॥ ૪૩॥

સ એવ વિષ્ણુર્દ્રુમ એવ મૂર્તો મહાત્મભિઃ સેવિતપુણ્યમૂલઃ ।
યસ્યાશ્રયઃ પાપસહસ્રહન્તા ભવેન્નૃણાં કામદુઘો ગુણાઢ્યઃ ॥ ૪૪॥

ઇતિ શ્રીસ્કન્દપુરાણે નાગરખણ્ડે સપ્તચત્વારિંશાધિકદ્વિશતતમાધ્યાયાન્તર્ગતં
અશ્વત્થમહિમાસ્તોત્રં સમાપ્તમ્ ।

સ્કન્દપુરાણ । નાગરખણ્ડ । અધ્યાય ૨૪૭/૨૪-૪૪॥

skandapurANa . nAgarakhaNDa . adhyAya 247/24-44..

Proofread by PSA Easwaran

*Ashvatthamahima Stotram*

pdf was typeset on August 23, 2025

Please send corrections to *sanskrit@cheerful.com*